यदि अयनांशशोधनमन्तरेणैव सूर्य्यस्य तत्तद्राशिघटकनक्षत्रस्थितिस्वीकारस्तदा इदानीमयनांशानुसारेण २०,२५, ४४, एतदंशादितः पूर्व्वं रवेर्मेषादौ गत्यावश्यकत्वात् तस्य च तद्घटकनक्षत्रस्थितेस्ततश्चतद्दर्शनक्षत्रस्य सन्ध्यायां प्रथमोदयापत्तिर्न च तथा दृश्यते तथा यस्मिन् दिने इदानीममापूर्णिमादयो दृश्यन्ते ततः पूर्वं २०,२५,४४ सूर्य्यचन्द्रयोरेकराशिस्थत्वेन अमावस्यापत्तिस्ततः पञ्चदशेऽहनि पूर्णिमापत्तिश्च नचैतत् प्रत्यक्षसंवादीति। अयनांशशोधनेन निरयनांशसंक्रमादितस्तु सर्व्वं प्रत्यक्ष संवादि। किं च सायनसंक्रमरहितस्य चान्द्रमासस्याऽधिमासत्वव्यवहारप्रसङ्गः संक्रान्तिद्वययुतस्य तस्य क्षयमासत्वव्यवहारप्रसङ्गश्च। एवं च बहुविप्लवात् चलसंक्रान्तेः मुख्यत्वेऽपि तेनैव मासवर्षगणनादिशङ्का न कार्य्या प्रागप्रदर्शितपुलस्त्यवचनेन, अयनशब्दे दर्शितेन सौरागमवाक्येन, "दिनरात्रिप्रमाणानां निर्णयो न भसंक्रमात्" अतः सकलकर्म्माणि" इति, सिद्धान्तशिरोमणिवाक्येन च स्मार्त्तकर्म्मविशेषे, लग्नज्ञानादिकर्म्मस्वेव तस्य मुख्यत्वाभिधानात् न तेन सर्व्वव्यवहारः अन्यथा तत्तद्विशेषोपादानं व्यर्थं स्यात्। एकान्तेन राशिसंक्रमानङ्गीकारे प्रागुक्तवचनजाते राशिसंक्रान्तिवत् पुण्यकालताभिधानानुपपत्तिः तथा च यथा मासवत्सराणामनेकविधत्वेऽपि क्रियाविशेषे तेषां ग्राह्यता एवं चलस्थिरसंक्रान्त्योरपि विषयविशेषेऽपि ग्राह्यता। किञ्च सायनसंक्रममात्रेण सर्व्वव्यवहारे अनेके विसंवादा पीयूषधारायां दर्शिताः। तेऽप्यत्रोपदर्श्यन्ते। सायनगणनया त्वयोग्येऽपि काले ग्रहःकदाचिदेकनक्षत्रान्तरे नक्षत्रयोरन्तरे वोपलभ्येत सूर्य्यचन्द्रयोस्तु तेजोबहुत्वान्नक्षत्रतेजःपरिभवान्न नक्षत्रसंनिधावुपलम्भो यद्यपि। तथापि कदाचित् क्षीणचन्द्रस्याप्युपलम्भोऽस्यत एव गोचरादिविषयक दुष्टफलानि एकराशिस्थितग्रहयोगफलानि च विरुध्येरन् ग्रहणादिविसंवादश्च। तस्मान्निरयनगणनयैव सर्व्वोऽपि व्यवहारो युक्तः यत्तु अजागलस्तनइवेत्यादि प्रागुक्तवचनम् 'पुण्यत्वं राशिसंक्रान्तेः केचिदाहुर्मनीषिणः नैतन्मम मतमित्यादिवशिष्ठवाक्यञ्च तत् चलसंक्रान्तेः स्तुतिपरम् "न निन्दानिन्दनीयं निन्दति किन्तु विधेयं स्तौतीति" न्यायात् अन्यथा संक्रान्तिशब्दे दर्शयिष्यमाणानां राशिसंक्रान्तिपुण्यकालताबोधकवचनानां बहूनां विप्लवापत्तेः "दिनपति संक्रमात् प्राक् षोडश नाड्यस्तु पुण्यकालः सः। परतः षोड़श नाड्यः स्नानदानकार्य्येष्विति" वशिष्ठस्यैव वचनान्तरेण विरोधः स्यात् अयनसंक्रान्तिषु तु अन्यविधस्यैव तेन पुण्यकालतोक्तेस्ततो विलक्षणविषयत्वौचित्यं तादृशवचनानाम्।

**अयनांशज** पु० अयनस्य अंशः तज्जः। प्राथमिकक्रान्तिवृत्तारम्भस्थानातिक्रमेण जाते मासे "अयनांशजमासान्ते व्युत्क्रमेणादितो बुधैः" ज्यो०तत्त्व०।

**अयव** पु० अल्पोयवस्तुल्योवा। १पुरीषजे क्रमिभेदे क्रमिशब्दे विवरणम् नास्ति यवः यज्ञसाधनं यत्र। अङ्गतया यवहीने तिलसाधने २पितृकृत्यादौ। यु मिश्रणे कर्त्तरि अच् न०त०। ३असम्बद्धे शत्रौ ४रबिचन्द्रयोर्वियोजके कृष्णपक्षे च "अयवानामाधिपत्यमिति पूर्वपक्षा वा यवाअपरपक्षा वा अयवास्ते हीदं सर्वं युवते चायुवते" इति शतब्रा०।

**अयवस्** पु० न युतः पृथग्भूतौ चन्द्रसूर्य्यौ यत्र यु—असुन् न०त०। अर्द्धमासे पक्षे। 'सजुरब्दो अयवोभिः" यजु० १२७४ "यवाश्चायवाश्चार्द्धमासाश्चोच्यन्ते वे०दी०।

**अयशस्** विरोधे न०त०। यशोविरोधिनि अपवादे। अयशो- "महदाप्नोति नरकञ्चैव गच्छति" मनुः। "स्वभावलोलेत्य यशः प्रमृष्टम्" रघुः। न०ब०। कीर्त्तिशून्ये त्रि० वा कप् अयशस्कः तत्रैव।

**अयशस्कर** त्रि० अयशः करोति कृ—ताच्छील्यादौ ट स्त्रियां ङीप्। अपवादकरे।

**अयशस्य** न० यशसे हितम् यत् यशस्यम् विरोधे न०त०। अपवादकरे "पैशुन्यान्ृतालस्यायशस्यानि हित्वा" सुश्रु०।

**अयश्चूर्ण** न०६त०। "शकृद्रसं तुरङ्गस्य सुशुष्कं भावयेदति। निःक्वाथेन विडङ्गानां चूर्णं प्रथमनन्तु तत्। अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक्" सुश्रुतोक्ते लौहचूर्णघटितौषधभेदे।

**अयस्** न० एति चलति अयस्कान्तसान्निध्यात् इण—असुन्। लौहे धातुभेदे तस्य स्थिरत्वेऽपि अयस्कान्तसान्निध्याच्चलनात्तथात्वम्। "सुहृदयोहृदयः प्रतिगर्ज्जताम्" "अभितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिणाम्" इति च रघुः "ताम्रायःकांस्यरैत्यानां त्रिपुणः सीसकस्य च" अयः कांस्यमलानाञ्च द्वादशाहमपाकृता" इति च मनुः। अयसः पाकादि अमृतसारशब्दे २२६ पृष्ठे दृश्यम्। अधिकं लौहशब्दे वक्ष्यते। उपचारात् २अयोनिर्म्मिते शस्त्रादावपि। "तेजोऽयसो न धाराम् ऋ०६,३,५, अयसः अयोमयस्य परश्वादेर्धाराम्" भा०। हिरण्यशृङ्गोऽयो अस्यपादाः ऋ० १,१६३,९भावे असुन्। ३गमने न०। 'ज्योतिरकारि हरितो